11

# वाच्यम्

**बालका:! एतानि उदाहरणानि ध्यानेन पठन्तु—**

| **(क)** | | **(ख)** |
|---|---|---|
| बालक: पाठं पठति। | — | बालकेन पाठ: पठ्यते। |
| छात्र: लेखं लिखति। | — | छात्रेण लेख: लिख्यते। |
| कृषक: कार्यं करोति। | — | कृषकेण कार्यं क्रियते। |
| शिक्षक: पाठयति। | — | शिक्षकेण पाठ्यते। |
| श्रमिक: पाषाणं त्रोटयति। | — | श्रमिकेण पाषाण: त्रोट्यते। |
| बालिका नृत्यति। | — | बालिकया नृत्यते। |
| धावक: धावति। | — | धावकेन धाव्यते। |
| क्रीडक: क्रीडति। | — | क्रीडकेन क्रीड्यते। |
| अहं गृहं गच्छामि। | — | मया गृहं गम्यते। |
| आवां भ्रमाव:। | — | आवाभ्यां भ्रम्यते। |
| वयं कार्यं कुर्म:। | — | अस्माभि: कार्यं क्रियते। |
| त्वं किं करोषि? | — | त्वया किं क्रियते? |
| युवां कुत्र गच्छथ:? | — | युवाभ्यां कुत्र गम्यते? |
| यूयं कन्दुकं क्रीडथ। | — | युष्माभि: कन्दुकं क्रीड्यते। |
| माता भोजनं पचति। | — | मात्रा भोजनं पच्यते। |
| पिता आपणं गच्छति। | — | पित्रा आपणं गम्यते। |
| मम मित्रं चलचित्रं पश्यति। | — | मम मित्रेण चलचित्रं दृश्यते। |
| अविवेकी वृक्षान् कृन्तति। | — | अविवेकिना वृक्षा: कर्त्यन्ते। |
| लता कथां शृणोति। | — | लतया कथा श्रूयते। |
| तृषार्त: जलं पिबति। | — | तृषार्तेन जलं पीयते। |
| बुभुक्षित: भोजनं करोति। | — | बुभुक्षितेन भोजनं क्रियते। |
| बालिका गीतं गायति। | — | बालिकया गीतं गीयते। |
| शिशु: रोदिति। | — | शिशुना रुद्यते। |

1075CH11

© NCERT not to be republished

| | | |
|---|---|---|
| अहं स्वपिमि। | — | मया सुप्यते। |
| त्वं पाठं स्मरसि। | — | त्वया पाठ: स्मर्यते। |
| स: कथां कथयति। | — | तेन कथा कथ्यते। |

उपरि उभयो: स्थानयो: कथनस्य भाव: एक: एव अस्ति परं कथनस्य शैली भिन्ना अस्ति। प्रथमे 'क' खण्डे वाक्येषु कर्त्तु: प्राधान्यम् अस्ति, क्रियारूपाण्यपि कर्तृपदानुसारं प्रचलन्ति। परं 'ख' खण्डे कर्मण: भावस्य वा प्राधान्यम् अस्ति, अत्र क्रियारूपाणि अपि कर्मपदानुसारं प्रयुज्यन्ते।

अत्र ध्यातव्यम् —

अवधेयांशा:—

- कथनस्य काऽपि विशिष्टा विधा वाच्यम् इति कथ्यते।
- वाच्यं त्रिविधं भवति -कर्तृवाच्यं, कर्मवाच्यं भाववाच्यञ्च।
- कर्तृवाच्ये कर्त्ता प्रधान: भवति, कर्तरि च प्रथमाविभक्ति: प्रयुज्यते, कर्मणि द्वितीया विभक्ति: भवति क्रियारूपञ्च कर्तृपदानुसारं प्रचलति।
- कर्मवाच्ये कर्मण: प्रधानता भवति, कर्मणि प्रथमा विभक्ति: भवति कर्त्तरि च तृतीया विभक्ति: भवति क्रियारूपञ्च कर्मपदानुसारं भवति।।
- यस्मिन् वाक्ये कर्म न भवति (अकर्मकधातुषु) तेषां भाववाच्ये परिवर्तनं भवति।
- भाववाच्ये क्रिया प्रथमपुरुषे एकवचने भवति।
- लज्ज्, ह्री, भू, अस्, विद्, स्था, जागृ, वृध्, एध्, शी, क्षि, भी, जीव्, मृ, स्वप्, क्रीड्, खेल्, रम्, रुच्, दीप्, ज्वल् इत्यादय: अकर्मकधातव: सन्ति।

कतिपयक्रियारूपाणि अध: प्रदीयन्ते—

| **कर्तृवाच्यम्** | **कर्मवाच्यम्/भाववाच्यम्** |
|---|---|
| पठति | पठ्यते |
| लिखति | लिख्यते |
| हसति | हस्यते |
| तिष्ठति | स्थीयते |
| ज्वलति | ज्वल्यते |
| वहति | उह्यते |
| भवति/अस्ति | भूयते |
| जागर्ति | जाग्रियते |
| स्वपिति | सुप्यते |
| जीवति | जीव्यते |

| | |
|---|---|
| सेवते | सेव्यते |
| लज्जते | लज्ज्यते |
| खादति | खाद्यते |
| क्रीडति | क्रीड्यते |
| रमते | रम्यते |
| रोचते | रुच्यते |
| वर्धते | वर्ध्यते |
| बिभेति | बिभ्यते |
| पतति | पत्यते |
| शृणोति | श्रूयते |
| पिबति | पीयते |
| पश्यति | दृश्यते |
| रोदिति | रुद्यते |
| गच्छति | गम्यते |
| पठति | पठ्यते |
| पाठयति | पाठ्यते |

## अभ्यास:

**1. अधोलिखितवाक्येषु कर्तृपदं परिवर्त्य वाक्यानि लिखत—**

(i) बालक: पायसं खादति।

............................ पायस: खाद्यते।

(ii) अहं फलं खादामि।

............................ फलं खाद्यते।

(iii) त्वं किं शृणोषि?

............................ किं श्रूयते?

(iv) आवां चित्राणि पश्याव:।

............................ चित्राणि दृश्यन्ते।

(v) वयं पाठं स्मराम:।

............................ पाठ: स्मर्यते।

© NCERT not to be republished

(vi) बालकौ धावतः।

................................ धाव्यते।

(vii) कुक्कुराः इतस्ततः भ्रमन्ति।

................................इतस्ततः भ्रम्यते।

(viii) गजः शनैः शनैः चलति।

................................शनैः शनैः चल्यते।

(ix) वानरः कूर्दति।

................................कूर्द्यते।

(x) अहं शाटिकां क्रीणामि।

................................ शाटिका क्रीयते।

**2. अधोलिखितवाक्येषु कर्मपदं परिवर्त्य वाक्यानि लिखत—**

(i) श्रमिकः भारं वहति।

श्रमिकेण ................................ उह्यते।

(ii) सः पाषाणं त्रोटयति।

तेन ................................ त्रोट्यते।

(iii) सा गीतं गायति।

तया ................................गीयते।

(iv) माता रोटिकां पचति।

मात्रा ................................पच्यते।

(v) पिता फलानि आनयति।

पित्रा ................................आनीयन्ते।

(vi) सेवकः सेवां करोति।

सेवकेन ................................ क्रियते।

(vii) चिकित्सकः उपचारं करोति।

चिकित्सकेन................................क्रियते।

(viii) नीलिमा पाठं स्मरति।

नीलिमया ................................ स्मर्यते।



© NCERT not to be republished

(ix) अहं गृहं गच्छामि।

मया ................................ गम्यते।

(x) आवां लेखान् लिखाव:।

आवाभ्यां ................................ लिख्यन्ते।

**3. अधोलिखितवाक्येषु क्रियापदपरिवर्तनं कृत्वा वाक्यानि लिखत —**

(i) अहं जलं पिबामि।

मया जलं ................................ ।

(ii) आवां विद्यालयं गच्छाव:

आवाभ्यां विद्यालय: ................................।

(iii) वयं ग्रामं गच्छाम:।

अस्माभि: ग्राम:................................ ।

(iv) त्वं फलानि खादसि।

त्वया फलानि ................................ ।

(v) छात्र: अध्ययनं करोति।

छात्रेण अध्ययनं ................................ ।

(vi) अहं श्रान्त: भवामि।

मया श्रान्त: ................................।

(vii) बालक: क्रीडति।

बालकेन ................................ ।

(viii) शिष्य: गुरुं सेवते।

शिष्येण गुरु: ................................।

(ix) पाचक: भोजनं पचति।

पाचकेन भोजनं ................................।

(x) धावक: धावति।

धावकेन ................................।

© NCERT not to be republished